जोयत्र तं सर्वासु रसान्वेषणार्थविलासे मनोज मु[illegible]द्युक्तो नासीदत्र क्रीडने मनोजः मु
दितः आनंदितः मनोजो यस्याननस्याभिलाषपूरणादित्यर्थः॥ यद्वा। एतां क्रीडने दैत्यादयः
आगत्योपद्रवकरणाद्रसभंगः स्यात्तन्निराकरणाय मधुसूदननामप्रयोगः दैत्यसूदनला
दित्यर्थः॥ एवंविधं॥ श्रीजयदेवेन भणितमिति॥ ॥श्रीजयदेवभणितमिदमतिशयमधुरि
पुनिधुवनशीलं। सुखमुत्कंठितराधिकया कथितं वितनोतु सलीलं॥ सखि हे०॥६॥ ॥इदं
उत्कंठितगोपवधूकथितं। तच्छुषं वितनोतु। उत्कंठा दूरणरूपं। सुखं विस्तारयत्वित्याशीः क
वेः॥ इदं पूर्वमुक्तं कितत्। उत्कंठितया उत्कंठायुक्तया गोपवध्वाः श्रीराधायाः यत्कथितं स्व
वृत्तमनुभूतं कथायामर्पितं तदा कथितमित्युक्तं। कीदृशं। अतिशयमधुरिपुनिधुवनशीलं
शयमाशयमतिक्रमतीत्यतिशयः॥ अभिप्रायादधिकमिति यावत्। अतिशयं मधुरिपोः धी
रोद्धतनायकशिरोमणेर्निधुवनशीलं। निधुवनं शीलयति विस्तारयतीति तत्। सुरतावरणीनि

धूवनंसुरतं।रतमित्यमरः॥निधूवनंसुरतंतस्यक्रीडनं।कीदृशंतत्।सलीलं।लीलयाक्री-
डयासहवर्त्तमानं।तत्।श्रीजयदेवभणितंतद्व्यतिरिक्तोनान्यःएतद्रसमएनेशक्तः॥संदर्भशु-
द्धिंगिरां।जानीतेजयदेवएवंतुक्तंखात्।नन्वीयंराधाभगवत्प्रियागोपेनसहविवाहाक-
रणात्कथंगोपवधूरित्यत्राह॥गोपोभगवान्गवांपातिरक्षतीतिगोपस्तस्यवधूः॥तर्हिभ-
गवतापिसानविवाहिमाकथंगोपवधूरित्यत्राह॥गोपोभगवान्गवांपातिरक्षतीतिगोप-
स्तस्यवधूः॥तर्हिभगवतापिसानविवाहिताकथंतस्यावधूत्वं।अत्रायमाशयः।कात्यायनी-
व्रताच्चरणेनंदगोपसुतंदेविपतिंमेकुरुतेनमइतिप्रार्थितस्तदाभगवतापुक्तंसंकल्पो-
विदितःसाध्व्योभवतीनांमदर्चनं।मयानुमोदितःसोसौसत्योभवितुमर्हतीत्युक्तत्वादुक्त-
त्वेनस्वीकरणात्नंदगोपसुतत्वाच्चगोपपदवाच्येनहरिस्तस्यवधूरित्यभिप्रायः॥यद्वा।पर-
स्मिन्नेवरसोत्पत्तिरितिरसशास्त्रोक्तत्वाच्चपरकीयत्वसंपादनार्थंगोपवधूत्वमपिसंभ

वृति। तथापि यमेवैष वृणुते तेन लभ्यत इति श्रुत्युक्तत्वाद्यमेवैष इत्येवकाराच्च वरणं विना
भगवत्प्राप्तिर्न भवेदतः कात्यायनिव्रताचरणेत्वचलाद्य गोपवधूरिति भावः॥ तर्हि भगवतः स्व
श्लाघ्यादिना मत्पक्षता गोपोक्त्या को हेतुः॥ गोपस्तुनारसभोक्ता। एकं दुग्धस्य नानाप्रकारा
:कलालेऽग्रे करोति। धारापानं धारोष्णं कथितं च पयः। मलाति ख्याता एवावाग्रोष्टं तप्तो घनी।
कृतं खोआख्छ्लणप एवासुधी पायमसं यावकं दुग्धपादयस्ततो दधी बद्धं चक्रनुद्ध
तसारं भगलोके घनं तक्रं लवणं नवनीतं क्षीरं कं द्धी उद्धृतं शिखिरणी दुग्धोदनं कथिताद
यो नानाविधप्रकारा गोरसास्तेषां भोक्ता गोपस्तद्रूपी भगवानपि नानाविधा नायका खं
ण्डिता विप्रलब्धा वासकसज्जाभिसारिका कलहांतरिता प्रोषितपतिका स्वाधीनभर्तृका
उत्कंठिता स्वीया परकीया सामान्यवनिता मुग्धा मध्या प्रगल्भा अज्ञातयौवना ज्ञातयौव
ना नवोढा धीरा धीराधीरा धीरादयो बहवो भेदाः संति तेषां शृंगाररसभोक्ता नां रसानां नाना

vallabhacharya Bhav Prabodhini

वानांगोलानभगवान्सर्वरससंभोगार्थमाविर्भूतोगोपरूपंकृत्वाविहारंकृतवान्अतस्तस्य।
गोपनामतथातद्बंधूनांनावबंधुकासतीवलंकंविताउलंकंविताज्ञातयाकथितं।तत्तत्कर्तृश्रोतृ
णांत्वसुखंवितनोतु इत्याशीः।।नन्वेवंविधश्चेत्तथापिरसशास्त्ररीत्यास्वपतिरन्यासक्तः।
श्चेत्तद्धर्मादीर्जनिवर्तिनत्तलंकंगेत्यत्राह।। ।।हस्तेन्यस्तेति।। हस्तन्यस्तविलासवंशः
मनृजुभ्रूवल्लिमद्बल्लवीवृंदोत्सारिदृगंतवीक्षितमतिस्वेदार्द्रगंडस्थलं।। मामुद्वीक्ष्यवि।
लक्षितंस्मितसुधामुग्धाननंकाननेगोविंदंव्रजसुंदरीगणवृतंपश्यामिहृष्यामिच।।२।।
हेसखिअद्यापियदाएवंविधंगोविंदंकाननेव्रजसुंदरीगणवृतंपश्यामितदाहृष्यामि।दृ
ष्टानावामि।सखीरीतिकथंगोविंदंइति।गोगोकुलपतिअभिषिक्तं।अतस्तासामेवपतित्वा
कात्यायनीव्रतेतानिश्चपतित्वेनकृतवानेषांनिवर्तिकीहरं।व्रजसुंदरीगणाः।सर्वसमृद्धिं
वंतंव्रजंतत्संबंधिन्यःसुंदर्यस्तासांराजसादिनानाभावयुक्तानांगणास्तैर्वृतंआसक्ति।

Geeta Govinda
Bhava Prabodhini

पूर्वकंवेष्टितं।ननुताःसुंदर्योनिर्वंधपरंबहुहावभावकटाक्षादिषुक्षणमननविध्यंति।एवं
विधानिर्जितलाल्किंमितीतत्राह।।पुनःकीदृशं।अन्तकुञ्जंबहिर्मदवल्लवीवृंदोत्सारितंगत
वीडितमपिकंदर्पलोभाक्रांतवल्लीवतंवल्लवीनांगोपवधूनांवृंदस्यउत्सारितेभिः।भावोद्बोधकै
रपांगैर्विशेषेणाञ्चितमवलोकितंअपि।पुनःकीदृशं।मामुद्वीक्ष्यविलासितस्मितसुधाम
धुराननं।।एवंविधमपिमांउद्दीप्यव्रजीवाकलाविशेषेणान्यत्रावलोकनराहित्यपूर्वकंइः
द्यपदृष्ट्वा।।यद्यत्तदधिकंविशेषेणत्यकेपुराधाष्टइपतेभवतिवानवेतिसंशयाविष्टःसन्
उदधिकंइत्यविलक्षितः।।विस्मयान्वितजातः।अतःकदावाकिमर्थंसमागताएवंविस्मयान्वि
तःसन्स्मितसुधयामुग्धंमनोहरंआननंयस्यतं।पुनःकीदृशं।हस्तस्रस्तविलासवंशं।हस्तात्स्र
स्तःविलासवंशोयस्यतं।।पुनःकीदृशं।विलाससमयेपिवंशःकदापिनत्यक्तस्तथापिईदृशीनाद
वयवशैथिल्यात्हस्तात्पतितः।पुनःकीदृशं।खेदार्द्रगंडस्थलं।।खेदेनार्द्रगंडस्थलंयस्यतंम

दर्शनतोपि सात्विकाविर्भावात्स्वेदातिशयेन गंडस्थलयोरार्द्रत्वं॥ एभिः षड्भिर्विशेषणैः षडैश्व
र्यादियुक्तोतिनिरूपितः॥ हस्तस्रस्तविलासवंशमिति॥ वैराग्यं पूर्वोक्तैवंविधोपि परमप्रियोपि वं
शो हस्तात्स्रस्तत्वात्॥ अनृजुभ्रूवल्लिमद्बल्लवीवृंदोत्सारिदृगंतवीक्षितमिति॥ ज्ञानात्मकचक्षु
प्रांतवीक्षितत्वाद्ज्ञानं॥ स्वेदार्द्रगंडस्थलमिति शोभाजनकत्वात् श्रीः॥ स्मितसुधामुग्धान
नमिति स्मितसुधोज्वलत्वाद्यशः॥ गोविंदमिति॥ गोगोकुलेश्वरत्वादैश्वर्यं॥ व्रजसुंदरीगण
वृतत्वाद्वीर्यं॥ एवंविधोपि मामुद्वीक्ष्य विलज्जितः किंचिद्विलज्जित इति पाठे। तथाविधवीक्ष
मीनां तद्व्रजसुंदरीणां अत्र गेहेप्ययामजीरवरहं रणात्तं पश्यामि हृष्यामि चेत्याशयः सू
चितः॥ छा॥ नन्वेवंविधश्चेत्त्वयि तदा स्वयमागमिष्यति॥ कथं सत्वरासीत्यत्राह दुरालो
क इति॥ दुरालोकस्तोकस्तबकनवकाशोकलतिकाविकाशः कासारोपवनपवनोपि।
व्यथयति॥ अपि भ्राम्यद्भृंगीरणितरमणीया न मुकुलप्रसूतिश्चूतानां सखि शिखरणी

यंसुखयति॥४॥समानश्रीलादियुक्तत्वाद्धेसखितंविनास्तोकस्तबकनवकाशोकलतिकाशोद्दूरालोकोनवति।स्तोकोल्पःस्तबकोगुच्छोयासांनवकानांत्रशोकलतिकानांविकाशःदुःखेनावलोक्यते।किंचसाक्षादनुभूयमानःकासारोपवनपवनोपिव्यथयतिसरोवरस्तदुपवनसंबंधीपवनस्त्रिविधोवायुर्व्यथांजनयति।अपिभ्राम्यद्भृंगीरणितरमणीयामुकुलप्रसूतिश्चूतानांइयंशिखरिणीसुखयति।भ्रमतीनांभृंगीनांरणितैःगुंजितैरमणीयामनोहरापिइयंपरिहृत्यासानचूतानांमुकुलप्रसूतिः।शिखरिणी।अत्राम्राणांकुसुमप्रकाशस्तावन्नागतापिशिखरिणी।शिखराणायत्रनागानियस्यांसाशिखरिणी।एवंविधामुकुलप्रसूतिरुत्पत्तिःप्रसूयतेसाप्रसूतिर्नसुखयति।अयंशिखरिणीछंदोविज्ञातव्यः।अशोकःशोकदःपीडाप्रदाता।स्तबकोभवत्।आसासारइवकासारोपवनस्याप्यपावनः।लक्षादंताच्चलक्षिका।भृंगीचैवात्रयंकरी।रमणीयाभिसरणंदाताद्दूताच्चूतंविना।वि

रंहेहरिपरीतंयत्सर्वंजातंयथाविधं॥अथैवंराधिकाक्लेशंज्ञात्वाश्रुत्वाच्चस्तथा॥यतोयदु
स्थितःसोपितंहरिष्यतिकेशवः।सचापिगमिताकांक्षोगोपीनांचनिभृतांचतांनिरीक्ष्यचिं
तयन्राधांचिरमासीत्इत्युच्यते।साक्षात्तमिति।केशवःवोयुष्माकंक्लेशंहरत्वित्याशीः॥न
नुकेशवत्वाद्व्रजसादिभावापन्नानांसुखदोयःसबकीनिःसूदक्रीडायांश्रांतोनचि
ष्यतितेनास्माकंक्लेशंकथंहरिष्यतीत्यत्राह॥कीदृशः।नवःप्रतिक्षणंनूतनतरःपुन
:प्रकृतिचापलंउक्तंभयंनरतिपतिरसर्वांश्चकारेत्याद्युक्तेर्नवः।यस्मात्त्वदुत्कर्षनिश्चये
ननवोजातःकीदृशःगोपीनांनिभृतंनिरीक्ष्यगमिष्यताकांक्षःतांविलोक्यगोपीनांनिभृ
तंनिरीक्ष्यसमूहेप्रत्येकंचक्रीडांकृत्वानितरामतिशयेनदृष्ट्वागमिताकांक्षायस्यसः।कि
कुर्वन्संतःचिरंचिंतयन्॥अतःअंतःकरणेचिरकालंविचार्यसत्रप्रतापसर्वोत्तमतांनि
श्चित्यअपरोत्तमान्यास्तीतिनिश्चयंकृत्वातासुगमितात्यक्ताकांक्षायेनसतथा।यद्वा।ग

Geeta Govinda
Bhava Prabodhini

मिताप्रापिताल्लयिश्रीकांक्षायस्येतिभावः॥ननुतन्निभृतंतादृशभावप्रकाशरूपंनभविष्य
तीत्यत्रभावप्रकाशकानिविशेषणान्याह॥साकूतस्मितमित्यादिभिः॥साकूतस्मितमाकु
लाकुलगलद्धम्मिल्लमुल्लासितभ्रूवल्लीकमलीकदर्शितभुजामूलार्द्धदृष्टस्तनं।गोपी
नांनिभृतंविलोक्यगमितांकांक्षांश्चिरंचिंतयन्नंतर्मुग्धमनोहरोहरतुवःक्लेशंनवः
केशवः।कीदृशं।गोपीनांनिभृतं।साकूतस्मितं।आकूतोविचारः।भावप्रकाशरूपस्तेनहसि
तं।स्मितमिषद्धास्यंयस्यतत्।तस्यानुरूपानंभविष्यतितत्राह॥आकुलाकुलगलद्धम्मिल्लं
।आत्यार्थाकुलत्तयागलत्धम्मिल्लेयथितकुसुमसमूहकेशबंधोयत्रतत्।कटाक्षादिमभ
विष्यतितत्राह।उल्लासितभ्रूवल्लीकं।उदधिकउल्लासउत्साहः॥भ्रुकुटीलीलानसाविशेषोय
त्रतादृशं।भ्रूवल्लीकंयस्मिंयस्मिंयस्मिंस्तत्तायवा।एवंविधंभ्रूवल्लीकोकुखंयस्मात्तत्
।स्तनमेवास्तुपरं।तुस्वांगसौष्टवादिदर्शनंभावप्रकाशकंभविष्यतीत्यत्राह।पुनःकीदृशं

कुत्रचित् दर्शितंभु ा मूलार्द्धदृष्टस्तनं ।। छलेन कर्किंडूयनादिमिषेण दर्शितः ।। भुजामूलार्द्ध
भुजस्य यत्र मूलार्द्धं दृष्टस्तनोयत्रतत् ।। भुजमूलं त्रासमंतात् ऊर्द्धंकृत्वा स्वहस्तांगुल्या स्तनन
खक्षतदर्शनव्याजेन दर्शित इति भावः ।। पुनः मुग्धमनोहरं ।। मुग्धं च मनोहरं च ।। स्वयमागत्यर
मणमाश्रितत्वात् मुग्धं पूर्वोक्तसाहृतस्मितमित्यादि विशेषणयुक्तत्वात् मनोहरं ।। एवंविधम
पिनिरीक्षितंतस्मिंरंचिंतयन् त्वत्सांगमनकल्पमानः सन्गमिताकांक्षस्तासुजात इत्यर्थः ।। वइ
तिवक्ष्यवचने पूर्वोक्ताभिप्रायः ।। यथा केन कविना ।। इति केशववत्वात्तासामेव नाविस्पागलक्षे
त्राहरिविलापाशयेनेतिभावः ।। एवमपि विरहेऽभिलाषादयो दशावस्था भवंति ।। तथाहि ।। अभिलाषा ।।
स्मृतिश्चिंता गुणानां कीर्तनं तथा ।। उद्वेगश्च प्रलापश्च तथोन्मादो व्याधिरेव च ।। जडता तथा मरणं
श्च वस्थाविरहे दशेति ।। विरहे स्वीयानुभूतसंयोगोत्कंठाभिलाषा ।। सखिहे केशिमथनमुदारं
रमय मया सह इत्यादिरूपाभिलाषा ।। प्रियचेष्टाद्यनुबोधितसंस्कारजन्यज्ञानं स्मृतिः ।। रासेह

रिमिहविहितविलासंस्मरतिमनोममेतिस्मृतिः।अहोरात्रौप्रियस्वरूपाध्यासाद्ध्यायंतंअना
गमनकारणमिलनादिचिंतनंचिंता।क्ष्यमाणतत्किंकामपिकामिनीमभिसृतःसंकेतीकृतमंजु
लवंजुललतागृहेपियन्नागतइत्यादिचिंतनंचिंता।विरहेतत्स्वरूपचरित्रप्रशंसाप्रतिपादनं
गुणसंकीर्तनं।गणयतिगुणग्रामं।तद्गुणान्येवगायंतः।जयतिलेधिकंजन्मनेत्यादिरूपंगुणग
संकीर्तनं।विरहेकायक्लेशजनकसकलविषयद्वेषस्तदुद्वेगः।निंदतिचंदनमिंदुकिरणम
नु।आवासोविपिनायतेत्यलमविनिर्दिष्टमपरिदेवनमुदाहरः।सामनुतेकृशातनुरतिनारमित्या
दिरूपोद्वेगः।विरहेप्रियाश्रितव्यवहारकथनंप्रलापः।विरचितविविधविलापंसापरि
तापंकरोत्युच्चैः।कथितसमयेपीत्यादिरूपःप्रलापः।विरहेऔत्सुक्यसंतापादिकारितमनोवि
पर्यासजनितप्रियाश्रितव्यवहारव्यापारकरणमुन्मादः।मुहुरवलोकितमंडनलीला।मधु
रिपुरहमितिभावनशीला।क्षिपतिचुंबतिजलधरकल्पंहरिरुपगतइतितिमिरमनल्पं।इ

।।९॰ तुन्मत्तवच्चोगोप्यः विचक्षैरुन्मत्तकवदित्यादिरूपोन्मादः।।विरहे मानसवाचिककायिक
मदनवेदनासमुच्छ्रितज्वरकार्श्यपांडुतादिदोषोव्याधिः।।अमंदंकंदर्पज्वरजनितचिंताकुल
तयाचलबाधांकंदर्पज्वरसंज्वरातुरतनुःविरहपांडुमुरारिमुखांबुजइत्यादिरूपोव्या
धिः।।विरहव्यथाविकारमात्रावेद्यसर्वेंद्रियाणांमनसश्चाज्ञानंजीवनावस्थानांजडता।।
मोहमूर्छायाःपर्यायःध्यायत्यक्ष्रमतिप्रमीलतिपतत्युद्यातिमूर्छत्यपीत्यादिरूपाजडता
मेहइति।।विरहेशरीरजीवयोरेववियोगोमरणं।।दुःसहप्रेष्ठविरहतीव्रतापाकुलयुरण
मयंदेहंइत्यादिरूपामरणावधि।।विरहेदशावस्थाजनयोर्भवंति।।तन्मध्येश्रीराधायामा
धवविरहेव्याधिस्मृतिगुणसंकीर्त्तनमुत्कंठाचावर्णितास्त्रन्यात्रप्यवस्थात्रयेणविसंलंभयो
।।एवंसर्गसमाप्तिः।। ।।इतिश्रीगीतगोविंदेश्रीजयदेवकृतौबालावबोधिन्यांटीकाया
मक्लेशकेशवोनामद्वितीयःसर्गः।। ।।नविद्यतेक्लेशोयस्यकेशवस्यमनोहारिश्रीराधा

दर्शनात्॥ यद्वा॥ श्रीराधायाः हस्तस्रस्तविलासवंशादिधर्मयुक्तं दर्शनात्। पश्यामि कृष्णामिव मणयति। गुणग्राममित्याद्युक्तेर्लोकेशानिष्टत्वास्मिन्नसंगतिः। अक्लेशकेशवो नामेत्यर्थः। गीतेनैकेन सर्गश्चित्तृतीयः प्रोच्यते। अथांतस्मिंश्च माधवो राधामाधाय हृदये विरं॥१॥ व्रजांगनागणस्त्यागं कृत्वा चैवं करकलिंदजाकुंजे नंगरागरखिन्नमानसस्तामितस्ततः॥२॥ अनुसृत्य च तत्तापो विषसादाथ माधवः॥ विरहो राधिकायाश्च हरेश्चात्र निगद्यते॥ अथैवंविधं निरूपितगमितां कां कुंजात्तेततः किं कृतवांस्तत्राह॥ ॥कंसारिरपीति॥ ॥कंसारिरपि संसारवासनाबद्धशृंखलां॥ राधामाधाय हृदये तत्याज व्रजसुंदरीः॥१॥ कंसारिरपि यः कंसं घातयित्वा शृंखलाबद्धौ पितरौ मोचयित्वा संसारात्कंसमपि मोचितवानेवंविधः कंसारिरपि राधां संसिद्धिरूपां अतः संसारवासनाबद्धशृंखलां॥ अहंताममतात्मकः संसारः तस्य वासनाः इयं मदीयाहमेव तदीय इति या संसारवासना बंधनरूपा शृंखला·

मित्यर्थः॥ अन्यतरज्ज्वादिबंधनंतुकालेजीर्णेछुरिकादिछेदेच भवेत्तथानश्रृंखलातःश्रृंखव
लेत्युक्तं। एवंविधां हृदये धृत्वा इतोधिकाकापिनास्तीतिहृदयेनिश्चित्य समृद्धिस्नेहातिसौ
दर्यादियुक्ताअपिव्रजसुंदरीस्तास्त्याजतासासांत्यागंकृतवान्।नन्वेवंविधास्ताःकथंत्य
क्तास्तत्राह॥ ॥राधामिति॥ ॥आराध्यसंसिद्धिरूपत्वात्तांहृदयेआधायतास्त्यक्ताः।तस्याम
पिततोधिकसमृद्धिस्नेहसौंदर्यादिभावःसूचितः।स्वयंवेदित्वादाराधनंकरोतिआराधनं
तुतदासिद्धिदंभवेद्वासनयातदेकपरतयाइतररागराहित्यपूर्वकंसर्वंतदात्मकंपश्य
ति।सासासासाऽऽगतिसकलोकमयमद्वैतवादइत्यादिवचसारंतदात्मकंज्ञात्वातास्व
पिविदारंकृतवांस्तथापियःस्वरूपनिष्ठोभवति।तस्यतद्भावनयापितत्स्वरूपंविना
संतुष्टःसर्वसौख्यान्नभवेत्त्वलंकंवितःसन्नत्रतत्तांहृदयेआधाय[illegible]येवक्ष्यमान
तस्यांलयसमाधिहेतविरहव्याधिःकथंवेद्यंतइत्यतआहव्रजसुंदरीलसाजेति।

नावश्लोकः।५२।प्रथमसर्गे राधामाधवयोरुत्कर्षेण निरूप्य संयोगानुभवं कृत्वा ततः श्रीरा
धायाः विरहाधिकोत्कंठादि द्वितीयसर्गे वर्णितानंतरमिदानीं श्रीकृष्णस्यापि तद्विरहेउत्कंठा
दि द्वितीयसर्गे वर्णितानंतरमिदानीं श्रीकृष्णस्यापि तद्विरहेउत्कंठादिकं निरूपयन्नेवाह।।कं
सारिरिति।यथा सा तस्मिन् उत्कंठितादियुक्ता जाता तथा कंसारिरपीति।।यथा सा तस्मिन् उत्कं
ठितादियुक्ता जाता तथा कंसारिरपि राधां आ सम्यक् हृदये धृत्वा व्रजसुंदरीस्तत्याज।कीदृ
शीं।संसारवासनाबद्धशृंखलां सर्वविनिवृत्त्यस्मृत्युपस्थापितविषये सम्यक् सारत्वेन तं प्राक्
निश्चितायावासनास्पृहा तस्यां बंधाय दृढीकरणाय शृंखलामित्यर्थः।।यथा कश्चिद्विवे
कीपुरुषस्तारतम्येन सारवस्तुनिश्चयात्तदेकनिष्ठस्तदन्यत्सर्वं त्यजति।तथायमपि।ततः कं
सारिः कंसुरवंश्री राधायामनुभूतं तदेव सारीकरणात्कंसारिः एवं निश्चितवांस्तत्याजेत्यर्थः
।ततस्तत्कृत्यमाह।। ।।इतस्ततस्तामिति।। ।।इतस्ततस्तामनुसृत्य राधिकामनंगबाणव्रत

णखिन्नमानसः।कृतानुतापःसकलिंदनंदिनीतटांतकुंजेविषसादमाधवः॥३॥समाधवःइ
तस्ततःतांराधांअनुसृत्यकलिंदनंदिनीतटांतकुंजेविषसाद।पः।एवंराधामाधवयोरित्य
नेनयमुनाकूलेकुंजेरहःकेलयोःकृत्वानंदानुभवंकृतवान्समाधवस्तांराधांयदा।
यथासदैसिधया।कांतारेकुसुमसुकुमारैरवयवैर्बकिनिहितेश्रीकृष्णानुसरणंकृतं
तथासोपितामितस्ततःतांअनुसृत्यान्वेषणंकृत्वाकालिंदीमाराधतिखंडयतितिकलिंदस्त
स्यानंददादात्रीकेशखंडनानंददात्रीविकायव[illegible]विधायास्तटांतकुंजेविषसादविषा
दंकृतवान्।कथंभूतःकृतानुतापःकृतःअनुतापोयेन।अन्वेषणंकृत्वाप्राप्तदर्शा
यांअनुपश्चात्कृतःतापःकृतवान्।कथंभूतःकृतानुतापःकृतः।अनुतापोयेन।अन्वेष
णंकृत्वाप्राप्तदर्शायांअनुपश्चात्कृतःतापःकृतानुतापःकृतइत्यर्थः।ननुहरिस्सर्वतःत
स्याइतस्ततोन्वेषणंकृतंयस्मिन्कुंजेसास्थितातत्रकथंनगतःइत्यर्थः।तत्राह।कीदृशः

Geeta Govinda vallabhacharya-agrahara.org Bhav Prabodhini

अनंगबाणव्रणखिन्नमानसः। अनंगबाणव्रणैः खिन्नं मनो यस्य स तथा। तद्रसस्वभावात्तद्रसाविष्टत्वात्कामार्त्तादिप्रकृतिरूपेणश्चेतनाचेतनेषु। इत्युक्तत्वादनंगबाणव्रणखिन्नमानसस्त्वात्तत्र गमनाशक्त इति भावः। यस्य सहस्रभुजविंशतिबाहुकानां महाबलिष्ठानां बाणासुररावणजरासंधभौमादिदैत्यानां बाणाः कुसुमप्रायाः आसन्सोधुनाअंगरहितस्य कुसुमबाणव्रणैः खिन्नमानसो जातः स्वनिर्मितरसभागस्तदात्मकत्वाच्च तथा जात इति भावः॥ किंच। यद्यंगसहितो न वेक्षणाश्चतादृशान वेत्तुनो जाने किं कुर्यात्। किंच। यः स्वोत्पत्तिकर्तुस्तदुत्पत्तिस्थानं मनः खिन्नं करोति स तेषां किं न कुर्यादिति। एवंविधो माधवः लक्ष्मीपतित्वात्खेदं न सहते। ततः कालिंदनदिनीतटांतकुंजे विषसादेत्यर्थः। विषादमाह॥ ॥मामियमित्यादिना॥ ॥मामियंचलिता विलोक्य वृतं वधूनिचयेन। सापराधतया मयापि न वारितातिभयेन। हरिहरिहतादरतया गता सा कुपितेव॥१॥ ॥अस्यापि गूर्जरीरागो यतितालश्च।

हरिहरीतिखेदे॥ साहृतादरतयाकुपितेवगतेत्यग्रमुखेस्फुटेइति॥ ॥ध्रुवपदं॥ ॥हरिह
रीतिखेदहर्षवर्केदुःखहरणार्थेस्वनामग्रहणे। स्वनाम्नोमाहात्म्यज्ञानस्वस्यैभवतिनान्यस्य
यथान्येषांममहरिर्नामेदुःखंहरतितथाममपिदुःखंहरत्वित्याशयेनहरिहरीत्यात्मवि।
सोक्तिरितिभावः॥ किंतद्दुःखमित्याह॥ गतासाकुपितेवेति॥ सापूर्वानुभूतगुणाश्रीराधाअ
दरस्याभावः। आदरताअदरतायस्यास्तया॥ यद्वा॥ हृतादरतयाहेलाकुपितेवगता। कुतो
हृतादरत्वमित्याह॥ मामियमिति। विरहेदशाद्वयं। अंतःसंवेदनंच। अंतःसंवेदनःदशायां
प्रत्यक्षेदृश्यमाणत्वादियंसमुक्तिः। इयंश्रीराधामांहृतःवधूनिचयेनवृतंविलोक्यचलिता॥
ननुतदैवकथंननिवारिता। दरानुनयःकथंनकृतस्तत्राह॥ सापराधतयेति। मत्सापराध
तयातिभयेनननिवारिता। पूर्वंशारदीयेरासेतयासहवधूनिचयेनवृतःआसीदधुनातांत्य
क्त्वाएताभिःसहविहाररूपयाअपराधेनसहवर्त्तमानः। सापराधतातयासापराधतयातिभ

येननिवारिता।यद्वासाअपराधतयामयाननिवारिता।ननुतदनंतरंश्रीराधांहृदयेआधाययथाव्रजसुंदरीणांत्यागःकृतस्तथातदग्रेतदैवतासांत्यागःकथंनकृतः।यथारूपितानगच्छतीत्यत्राह।अभिनयेनेति।ताअपिवध्वः।कात्यायनीव्रतंकृत्वा।ताभिःफलितेनवरेणात्तासांवधूत्वादृढनिचयेनवृतमित्युक्तं।अतस्तासांत्यागस्तत्समक्षेकरणादपमानिताःसंत्यःनजानेताःकिंकरिष्यंतीतिभयेननतथादरेणकृतइतिभावःसूचितः।अत्रतस्याःनामत्यक्तासाऽस्यमितिशब्दव्यवहरणादयमाशयः।भगवतास्यामनुभूतरसस्यतारतम्यज्ञानार्थमितासुविलासःकृतस्तत्स्याम्यमनसान्यःमानेनगताकांहेनतामुक्तीद्यचतास्त्यक्तास्तदनयानज्ञानी।किंवातांहृदयेआधायेतस्तत्स्यान्वेषणकरणादनंगबाणव्रणखिन्नमानसोजातः।तन्नामग्रहणेन।स्यामनुभूतगुणस्मरणादप्राप्तदशायांनजानेकिंस्यादतोननामग्रहितमिति।

भावः॥ननुलल्लताहृतादरतयाकुपितागताचेत्तदानुतापविषादादिकंकथंकरोषीत्य
त्राह॥ ॥किंकरिष्यतीति॥किंकरिष्यतिकिंवदिष्यतिसाचिरंविरहेण।किंजनेनधनेनकिं
ममजीवितेनकिंसुखेनगृहेण॥२॥तन्नुजातमेवातपरमग्रेसाकिंकरिष्यति।याशार
दीयेरासेंतर्हितेमयि।अटतियद्भवानह्निकाननं।त्रुटिर्युगायतेत्वामपश्यतां।कुटिल
कुंतलंश्रीमुखंचतेजडउदीक्षतां।पक्ष्मकृद्दृशामिति।श्रीमुखादृशावरदनिघ्नतो
नेहकिंवधइतिवदंतीस्थिताग्रेवक्ष्यमाणसखीवाक्यात्।क्षणमपिविरहःपुरा।
नसेहेनयननिमीलनखिन्नयाययाते।श्वसितिकथमसौरसालशाखांचिरविरहे
णविलोक्यपुष्पिताग्रामिति।स्वच्छंदंबहुवल्लभःसरमतेकिंतत्रतेदूषणं।पश्याद्यप्रि
यसंगमायादयितस्याकृष्यमाणीगुणैरुत्कंठार्त्तिभरादिवस्फुटदिदंचेतःस्वयंया
स्यति।बाधांविधेहिमलयानिलपंचबाणप्राणान्गृहाणनगृहंपुनराश्रयिष्येइत्या

दिवाकैः साचिरं विरहेण अधुना किं करिष्यति। सखी प्रति किं वदिष्यति अहं न जाने। न
नु किमिति विषादं करोत्येव सर्वस्वं धनं लक्ष्मीमाधवत्वात्। वदः श्रियैकरमणं चेत्युक्त
त्वात्॥ यद्वा॥ गोपाललाञ्छनं गोधनं लक्ष्म्या सह विलासगोधनं पलायेत्यत्राह॥ येयथा
मां पूर्वं सेवितास्तथैव न जानाम्यहमिति हेतो मदर्थे सा तथा चिंतायाचेत्तदा किं धनेन द्वि
धेन किं तर्हि युवतिजनेन सह सर्वं नित्यं विहारश्चैतेन सह सततं तथाधुनापि कुर्वित्यत्रा
ह॥ जनेन किमिति॥ तां हृदये आधाय समज्ञानस्त्यक्तः सदा मम तज्जीनेन किं न रहं पुनराश्रि
यिष्य इति वदमाणः तयोक्तस्तदा मम रहेण किं मदर्थे सा दुःखिता तदा सुखेन किं जी
वितेन किमिति तां भोज्ञो जीवामित्वया विनेति वचनं संभाव्यते वा न वेति तया सर्वं तु कलात्तां
विना मम जीवितं नेत्याशयः॥ अत्र भगवतो पुष्टिभाववस्थावर्णिता॥ कायकौ राजनकसक
लविषयत्यागात्॥ नन्वेवं त्वयि सा स्निग्धा तदा कुपिता न गताका विष्यतीत्यत्राह॥ ॥ चिंतया

ीत०भाव०
८६

प्रबोधिनी०

मितदाननंकुटिलभ्रूकोपभरेण।शोणपद्ममिवोपरिभ्रमताकुलंभ्रमरेण।हरिहरि॥३॥
अंतःस्फूर्त्तीह।अहंतस्याः आननंध्यानेकुटिलभ्रूरोषभरेणरोषातिशयेनकुटिलाभ्रू
यत्रतादृशंपश्यामि।कीदृशं।कमिव।उत्प्रेक्षते उपरिभ्रमताभ्रमरेणआकुलंव्याप्तंशो।
णरक्तंपद्ममिव।रोषादरुणंपद्मस्थानीयंमुखं।भ्रमताकुलंभ्रमरस्थानीयंकुटि-
लभ्रूयुक्तमित्यर्थः॥यद्वा।तदाननंचिंतनेकुटिलभ्रूरोषभरेणशोणपद्मतुल्यंतन्मु-
खं।तदुपरिभ्रमताभ्रमरेणतुल्योहरिरितिभावः।अनेनात्रचिंतावस्थानिरूपिता।वि-
रहेप्रिया।प्राप्तिदशायामदृष्टौतत्स्वरूपचिंतनानागमनकारणमिलनादिचिंत-
नंचिंता।नत्वेवंप्राप्तासि।तदातदनुसरणं।वनेकृतानुनयादिनाप्रसाद्यकथंनरमय-
सीत्यत्रतामहंतन्विखिन्नमितिपदद्वयेनाह॥ ॥तामहंहृदिसंगतामनिशंभृशंरम-
यामि।किंवनेनुसरामितामिहकिंवृथाविलपामि।हरिहरि पा०॥तन्विखिन्नमनस्

८६

ययाहृदयंतवाकलयामि।तनवेद्मिकुतोगतासिनतेननुनयामिहरि॥५॥तच्चिंतनेनाहहृदि
संगतामनिशंनिरंतरं[illegible]सर्थैरमयामि।वनेकिमर्थंतामनुसरामि।अन्वेषणंकरोमि।ता
मुद्दिश्यवृथाकिंविलपामि।बहिःसंवेदनादाह॥तन्वीति॥ ॥हेतन्विमहत्कोपेनकृशासि
अतस्तवहृदयमसूययाक्रोधेनातिखिन्नंखेददुःखंकलयामि।ततउत्कर्षेणानायोग्यमरूपे
णखेददुःखमहंमन्ये॥तेनहेतुनानतेनतवपादपतनेनानुनयामि।अनुनयंकृत्वापराध
क्षमापयामितत्रागत्यइतस्ततस्तामनुसरणंकृत्वातथापितन्नवेद्मि।कुतोगतासिकुत्रगता
तन्नजाने।अत्रोन्मादावस्थाविरहदैन्यौत्सुक्यसंतापादिकृतमनोविपर्यासजनितप्रियाभ्रिन
रूढमवहारंरचितविपारकरणकथनोन्मादः।पुनरंतःसंवेदनेस्फूर्त्यपयिगमनेनाह।ननु
गतानवेत्सिनदाहृदयमसूययाखिन्नंकथंकलयसीत्यत्राह॥दृश्यसइति॥हेदृश्यसइति
॥दृश्यसेपुरतोगतागतमेवमेविदधासि।किंपुनरेवससंभ्रमंपरिरंभणंनददासि।हरिह

गीत० भाव०

८७

रिणहा। ममपुरस्त्वं गतागतं गमनागमनं विदधासीति। हरपते। असूयया हृदयं खिन्नं न चेत्तदा
पुरेव ससंभ्रमं परिरंभणं किं न ददासि। पुराइव पूर्ववत् यथा ससंभ्रमं संभ्रमरेण स्नेहाति।
शयेन सहवर्त्तमानमालिंगनं दत्तवत्यसि। तथाधुनापि पुरेव ससंभ्रमं परिरंभणं किं न ददा
सि। अतोसूयया खिन्नं तव हृदयं कथयामि इत्यर्थः॥ ननु कथं परिरंभणं ददामि मया सह
त्वयेदृशं मां त्यक्त्वान्याभिः सह रमणं कृतमित्यत आह॥ ॥क्षम्यतामपरमिति॥ ॥क्षम्यताम
परं कदापि तवेदृशं न करोमि देहि सुंदर दर्शनं मम मन्मथेन दुनोमि॥७॥ हे सुंदर। तव।
सौंदर्यातिशयोत्कर्षादि ज्ञात्वाथेमपि कृतं त्वदपराधं। क्षम्यतां तव अपरं ईदृशं त्वदति
रिक्तान्यरमणीं कदापि न करोमि। अतो मम दर्शनं देहि। हृदि संगता भामिनि निशंकं शं रमय
सि तदा त्वामि कथं पार्थयसि। यतः सुंदरि त्वदधिकं सामर्थ्यं वा सौंदर्यं कुत्रापि नास्ति य
द्यपि एवंविधा हृदि संगतापि नेत्रनिमिलितचिंतनेना निशंकं त्वं शं रमयामि तथापि सौंदर्या

प्रबोधिनी०

८७

Geeta Govinda Bhava Prabodhini vallabhacharya-agrahara.org

द्यवलोकनंसाक्षाउद्घाटितनेत्रदर्शनंनाविधालसवलितादिभावपूर्वकपरस्परावलो
कनसुखातिशयदर्शनं।विनानभवेदतोदर्शनंदेहीतिभावः।अतस्तद्दर्शनंविनामन्मथेन
।मनोमथ्नीतिमन्मथोविरहः।कामोवातेनदुनोमिदुःखितोस्मिदुःखितेपिमनसिसम्यक्
चिंतनमपिनभवेदतोदर्शनंप्रार्थना।मन्मथेनदुनोमीत्यनेनाधिव्याध्यवस्थानिरूपिता।विर
हेमानसवाचिकाकायिकमदनवेदनासमुच्छितसंतापकार्श्यपांडुतादिदोषोव्याधिः।एवंवि
धोमाधवः।कलिंदनंदिनीतटांतकुंजेविषसादेत्यर्थः।।ललितलवंगच्चंदनचर्चित्तगीतहृ
यकृत्यरमणंश्रीराधांप्रतिसख्योक्तं।संचरदधरसुधा।।निभृतनिकुंजगृहंगतयेतिगीत
हृयकृत्यंराधायाःसखीप्रत्युक्तं।मामियंचलिताविलोक्येतिभगवत्कृतविषादस्तदा।।
कोपिसमीपेनासीत्तदाहरिकृतविषादःकेनापिश्रुतःकेनवर्णितइत्याकांक्षायामाह
।वर्णितंजयदेवकेनेति।। ।।वर्णितंजयदेवकेनहरेरिदंप्रवणेन।बिंदुबिल्वसमुद्रसंभव

रोहिणीरमणेनाहरिणाजाइदंहरेरितितंजयदेवकेनजयदेवएवजयदेवकःस्वार्थेकप्र
त्ययः।तेनदेवत्वादतींद्रियज्ञानत्वाद्वर्णितं।देवत्वान्येपिदेवाःकथंनवर्णयंति।तत्राह॥
कोहंत्रोनजयदेवकेनप्रवणेनदेवाविस्मृतबहिर्मुखास्तेभगवत्प्रवणाननवेदुः।अयं
अतएवभगवत्परायणत्वादंतर्मुखोनिज्ञश्चाकुलोनिज्ञंतत्राह।केंडुबिल्वसमुद्रसंभव
रोहिणीरमणेन।केंडुबिल्वनामजयदेवस्यग्रामं।किंडुश्चाप्रसिद्धंकुलंवा।तस्यमहत्त्वात्समु
द्रत्वंतस्मात्संभवोरोहिणीरमणश्चंद्रस्तेन।किमेतावता।अस्यायमर्थः।कश्चइंडुश्चविल्व
चवबयोरैक्यत्वात्।तेकेंडुविदस्तेषांतत्रादानंआश्रयोयस्मिन्तत्केंडुबिल्वतन्नाम
समुद्रसंभवश्चंद्रोसावितिकिमाशयः।कशब्देनब्रह्माज्ञानात्मकः।इंडुशब्देनचजीवोज्ञा
नाधिष्ठानमनसोजातत्वात्सोपिज्ञानात्मकः।विदज्ञानेतत्प्रसिद्धं।एतेषुत्रिषुभिन्न
तम्नविष्प्रवर्तमानत्र्याधिभौतिकत्र्याध्यात्मिकत्र्याधिदैविकज्ञानानामादानंय।

Geeta Govinda
Bhava Prabodhini

त्रा॥ उक्तः तज्ज्ञो मेकुले वानाचीनगवदात्मकं भगवज्जरूपराजाधिराजश्रीरमणीत्यधवावत्ता॥
रश्रीजयदेवस्वरूपाकंठाकृतानां तेषामाश्रयो यस्मिन्नेवंविधसमुद्भसंनवरोहिणीरमण
स्वरूपस्तद्रूपो जयदेव एव जयदेवस्वरूपत्वाद्भगवन्मनसो ज्ञानत्वात्तन्मनोगतं सर्वं वेत्तीति
दातदुक्तं कथं न वर्णयितव्यतो वर्णितमिति। नो चेदेतद्दर्शनसामर्थ्यं नान्यस्य न भवेदितिभाव
ः रोहिणीरमणोस्त्याचंद्रमसः सप्तविंशतिनक्षत्राधिकासु स्त्रीषु सत्स्वपि रोहिण्यामेव·
रमणं करोतीति तदासलाज्ञोहिणीरमणः प्रोक्तस्तथा भगवान्व्रजनायकोपि राधारमणका
ह्वीतः तथा तद्रूपो जयदेवोपि अन्यासु स्त्रीषु सत्स्वपि पद्मावतीचरणचारणचक्रवर्ती। प्रोक्त
ः। यथा तस्य चंद्रत्वं तथा तत्पत्न्या रोहिणीरमणश्चोक्तस्तेन समानधर्मत्वादेतद्वर्णनकर्तुर
पि तथात्वं ज्ञापितं॥ एवंविधैतद्वर्णितं इत्यर्थः॥ अतः परं पूर्वमुक्तं मनसापेयतुनोमीति तत्कं
तं तुः स्वं ज्ञालातं प्रस्तुवाचेत्यत्राह॥ ॥ उदितविशिलतेत्यादिना॥ ॥ उदितविशालतमाहारोना

यंभुजंगमनायकः॥कुवलयदलश्रेणीकंठेनसागरलद्युतिः॥मलयजरजोनेदंभस्मप्रियार
हितेमयिप्रहरहरभ्रांत्यानंगक्रुधाकिमुधावसि॥११॥हेअनंगक्रुधाकिमुव्यर्थंधावसि॥त्वमंग
रहितश्चातोऽचक्षुत्वान्नपश्यसि।अत्रोल्वलान्नक्षणेपिकोपात्।कथंधावसिक्रुधाहरभ्रांत्या
मयिनप्रहरकथंभ्रांतिः॥भुजंगमगरलभस्मादिनाहरएवज्ञातइत्यत्राह।कीदृशेमयि।प्रिया
रहिते।हरःप्रियारहितोनभवति।सर्वदार्द्धांगेस्थितत्वात्।किंचप्रियारहितसंतापसंत्यर्थंहृ
दि।बिसलताहारोयंभुजंगमनायकः।वासुकिःसर्पोन।कुवलयदलश्रेणीकंठेयाद्दीराब्रे
निःकासितासागरलद्युतिर्न।तथाचेदंदृश्यमानंमलयजरजः।भस्मन।अतोहरभ्रांत्याप्रहा
रंमाकुर्वित्यर्थः॥नन्वेवंकथंवदसिकामोहमनंगःप्रद्युम्नस्त्वब्रह्मणःसकाशात्कमला।
दात्मादेर्जायते।पुत्रश्चातोहमपिब्रह्मधर्मवान्।अपादपाणिर्जवनोग्रहीता।पश्यत्यचक्षुःस
शृणोत्यकर्णइत्यादिधर्मवाननंगोहमप्यपाधावयामि[illegible]हं।अचक्षुःपश्याम्यकर्णः

Geeta Govinda vallabhacharya-agrahara.org Bhav Prabodhini

Geeta Govinda vallabhacharya-agrahara.org Bhav Prabodhini

श्रूणोमीत्यतो हरिं ज्ञात्वा प्रहरामीति चेत्त्वदहं पितामनसिजश्चातो मां कथं प्रहरसि त
त्र न केवलं मदंगदाहाद्भवः मम रिपुः तच्चानपि मदुलंघितं तत्र विचारत्वात्। त्वमपि मद्रि
पुः। तदा प्रियासहायीभूतेन त्वया मच्छास्त्रविचारो जितो धुना तत्र सहायरहितत्वात्साप्राव
सरः सन्तां करोमि। त्वन्मदातिलोजत्वात्कृतमिति। तदाह। मैवं विध। कृपानिर्मितः॥ किंच। ए
तद्दस्य स्वभावात्तत्परवशातया त्वत्तज्ज्ञानं तिरोहितं। नोचे[illegible]स्य तन्नवैधिकृतो गतासीत्या
दिकथनं नोचितं तथा ममैवंविध तदर्थं निर्मितत्वादिदमपि तथा करोमीत्यत्राह॥ पाणौ मा कु।
र्विति॥ ॥पाणौ मा कुरु चूतसायकममुं नाचापमारोपय क्रीडानिर्जितविश्व मूर्छितजनाघा
तेन किं पौरुषं। तस्या एव मृगीदृशः स्मरस्फारोदंचत्कटाक्षानलज्वालाजर्जरितं मनागपि मनो
नाद्यापि संधुक्षते॥१२॥ एवंविध हे क्रीडानिर्जितविश्व। क्रीडया निर्जितं विश्वं मदात्मकं येन
।मया तव तंत्रविचारं क्रीडया जितं। त्वयापि मदात्मिकं विश्वं क्रीडया निर्जितत्वात्साम्प्रतं जा

ता।अतोधिकंत्वयानकर्त्तव्यंतस्मादमुंचूतसायकंपाणौमाकुरु।परिहृत्यमाएणंहस्तमकुरु।
बाणाःपाणौकृतवानसि।तदापाणावेवास्तांचापंमारोपय।चापारोपितोबाणःघातयिष्यति
।मूर्छितजनाघातेनकिंपौरुषं।कथंमूर्छितस्तत्राह।।तस्याएवमृगीदृशोमनसिजप्रेंखत्कटाक्षा
शुगश्रेणीजर्जरितंमनागपिमनोनाद्यापिसंधुक्षते।सर्वक्षितरासेंतर्हितागमनानंतरंप्रेमसंरं
भविकलासतीसर्वक्षितत्यागेर्ष्याहंतितंवैकटाक्षैःसंदष्टदशनच्छदा।एवंविधंकृत्यंस्म:
त्वाह।तस्याएवमृगीदृशः।मृगीवच्चपलेदृशौयस्याःश्रीराधायाःअतएवमनसिजप्रेंखत्का
मप्रेरितात्सुच्छलितकटाक्षाशुगसमागमादृशत्वात।आशुगच्छंतीत्याशुगाबाणास्तेषांश्रेणीनि
र्जर्जरीकृतंमनःमनागपिस्वल्पमपिअद्यापिनसंधुक्षतेनदीप्यते।स्वस्थंनवर्तति।एवंविध:
जनस्यमूर्छितस्यत्रासमंतात्घातेन।किंपुरुषार्थः।नकिमपीत्यर्थः।।ननुतस्यांमनसिज
बाणाःकुतस्तत्राह।। ।।भ्रूपल्लवमिति।। ।।भ्रूपल्लवंधनुरपांगतरंगितानिबाणागुणःश्रव

णपालिरतिस्मरेण। तस्यामनंगजयजंगमदेवतायामस्त्राणि निर्ज्जितजगंति किमर्प्पितानि। उ
। श्रीराधायामित्यमुना प्रकारेणास्त्राणि स्मरेण किमर्पितानीति मन्ये। ऊंतेर्पितानि। कीदृश्यां। अनंग
जयजंगमदेवतायां। अंगरहितस्य विश्वजयोसंभावनीयस्तद्देवताश्च सादाक्षु यमापमानत्वाद
नंगजयजंगमदेवता तस्यां। कीदृशान्यस्त्राणि। निर्ज्जितजगंति। निर्ज्जितानि जगंति यैस्तानि।
तत्प्रसादं लब्ध्वा स्वैर्जगज्जितत्वात्तदुपकारस्तस्यामेवार्पितानि। स्थापितानीति भावः। कान्य
स्त्राणि। भ्रूपल्लवं धनुः। अपांगतरंगितानि बाणाः। कटाक्षतरंगरूपाः। गुणः श्रवणपालिः।
श्रवणप्रांतभागपर्यंतः। श्यामनेत्ररेखा गुणः। धनुषः प्रत्यंचा एवंविधान्यस्त्राणि अनंगजय
जंगमदेवतायां स्मरेण इति प्रकारेणार्पितानीति भावः॥ कामादिपदं त्यक्त्वा तत्स्मरेणा दे
वंविधावस्था जायमानत्वात्तत्स्मरेणेत्युक्तमित्याशयः॥ एवं परोपकारिण्यास्तव मयि निर्दयता
नोचितात्यत्राह॥ भ्रूचापे निहित इति॥ ॥भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथाश्या।

मात्माकुटिलःकरोतुकबरीभारोपिमारोद्यंसोयंतावदयंचतन्वितनुतांबिंबाधरोरागवान्
सद्वृत्तस्तनमंडलस्तवकथंप्राणैर्ममक्रीडति॥४॥ ॥हेतन्वीतिसंबोधनमसामर्थ्यपरं।त्वमपि
मद्विरहेणक्षामात्वासामर्थ्यरहितासितवभ्रूचापेनिहितःकटाक्षविशिखोनिर्मातुममर्मव्य
थां।तनुत्वंगतस्यासातन्वीअसमर्थापितवकटाक्षविशिखःभ्रूचापेआरोपितःसमेमर्मव्य
थांनिर्मातु।इदमनुचितंचापारोपितोबाणस्ताडितोऽस्वदत्वात्।त्रपामात्माबाह्याभ्यं
तरतःकुटिलःस्वभावतःकबरीभारोपिमारोद्यमं।मारःकामःमारणोद्यमंवाकरोतु
।तदप्युचितं।त्रपामात्माकुटिलामप्यमेवस्वभावः।चपरं।तत्कस्याप्रत्यक्षदर्शनात्।
अयंबिंबाधरःरागवान्।तावन्मोहंतनुतां।इदंयुक्तमेवबिंबोबुद्धिभ्रंशकोमोहजन
कः।अधरोलोभात्मकस्तथारागोनुरागस्तद्वान्सोपिमोहंमदीयंतनुतां।इदंत्वनु
चितं।तन्वीसंबोधीसद्वृत्तस्तवस्तनमंडलःप्राणैर्ममक्रीडतीति।सद्वृत्तःसुवर्तुलःसद्वि

रितोवास्तनपते।प्राणधारणंकारयते।इतिस्तनःमंडलःश्चमंडयतिधारयतीतिमं
डलःयथाम्रमंडलःधारणात्मकःतवराधायाःआराधनरूपासंसिद्धिरूपातस्याः।
एतादृशौस्तनौसर्वस्यागंडकत्वात्त्वदेकनिष्ठस्यपतस्यप्राणैःसहक्रीडति।यथाद्यैःदृपणादानरूपा
क्रीडातथायमपिक्रीडति।प्राणैरिति।बहुवचनात्त्वयिधृतासवस्त्वांविचिन्वते।इतिवाक्यात्ता
सांसर्वासांप्राणामयितिष्ठतितैःसहक्रीडतिचेत्तदासहस्त्रानामिदमपिनोचितं।परैःस्थापित
वस्तुभिःक्रीडनंतानिश्चमयिस्थापितास्तेतुमदीयाएव।अतोममप्राणहरणरूपांक्रीडांक
थंकरोतिसत्त्वरितस्यतथाचरणंनोचितमितिभावः।मारोमृत्यौविषेनंगेइतिष्टत्तेचवक्ष्यते
पद्येचरित्रेचाचरितेतथाइतिविश्वः॥अथैवंस्तनमंडलस्मरणेनतस्याःस्पर्शादिविषया
नुभवस्फूर्त्याहि।। ।।तानिस्पर्शसुखानीति।। ।।तानिस्पर्शसुखावहानिनिर्मलानिस्निग्धादृ
ढानिबिम्बमस्तकक्रांभुजसौरभंसचसुधास्यंदीगिरांचजिह्वा।साबिंबाधरमाधुरीतिविशे

षयासंगेपिचेन्मानसंतस्यांलग्नसमाहितंताविरहव्याधिःकथंवर्द्धते॥५॥हंतइतिखेदे।
हृष्टाश्च:उचितंखेदोविखादस्वस्तेनपथेति॥तस्यांश्रीराधायांलग्नसमाधिमानसंचेत्तर्हि।
विरहव्याधिर्वर्द्धते।वियुक्तयोरेवविरहःस्यादत्रतुमनःसंयोगेसत्यपितद्रूपादीनांपंचेंद्रिया
णांविषयसंयोगेविरहव्याधिर्वर्द्धत्येवतत्राहहंतानीति॥इत्यमुनाप्रकारेणविषयाणांआस
मंतात्संगेपिपंचेंद्रियसुखेऽनुभूयमानेपि।कोसौप्रकारस्तत्राह।तानिस्पर्शसुखानिपूर्वा
नुभूतानिसात्विकाविर्भावोत्पादकानितेनत्वगेंद्रीयसुखानुभवः।तिचतरला।स्निग्धा।
दृशोविभ्रमाः।चपरंतेपूर्वानुभूतास्तरलाअतिचपलाःस्निग्धातियुक्तादृशोविभ्रमास्त्रलं·
सवलितादिभावविलासास्तेषांस्मरणाच्चक्षुरिंद्रियस्वरूपसुखानुभवः।तद्वक्त्रांबुजसो
रभं।तन्मुखकमलसौगंध्यंतेनघ्राणेंद्रियस्यसुखं।सचसुधास्यंदीशितलांवाक्रिमा।चपरं
सपूर्वानुभूतामृतश्राविणीगिरांनानाप्रकारवक्रोक्तिरसविशेषो[illegible]त्पादिकाअंगुल्या

कः कपाटं प्रहरति कुटिले माधवः किं वसंतो नो चक्रीत्यादि रूप सुधास्यंदी वगिरां वक्रिम
णः भावः वक्रिमा। तेन श्रवणेंद्रियस्य शब्द विषय सुखानुभवः। तथा च सा बिंबाधर माधुरी
सा ध्रुवं कि मोहं तावदनुतामीदृशी बिंबवदधरस्य माधुरी तेन रसनेंद्रियस्य रस विषय सु
खानुभवः। इत्यमुना प्रकारेण तस्यापरोपकारिण्यां लक्ष्य समाधिर्यस्यासौ लक्ष्यसमाधिस्त
स्यां मनो यस्य स तं मानसं प्रयाति। यद्वा। तस्यां लक्ष्यं समाधौ मनो यस्य लक्ष्यसमाधिमानसस्तं वि
षय विरह व्याधिः कथं वर्द्धते· इत्यसमंजसं दृष्ट्वा खेद इति भावः। विरहे एवंविधाभिलाषा
दयोवस्था हरावपि वर्णिता। अतः परं एवंविधां स्वस्वामिन्यामवस्थां विलोक्य प्रियतममान
यितुं गतवती सखी यावदहं प्रियमानयामि तावत्स्वसखी प्रतिद्देहमाभिवांछया मामुदीक्ष्य
विलंबितं गतं श्रीराधिकावचनं प्रमाणीकृत्य तदीक्षणादिशिख प्रयोगं कृतवतीत्यत्राह॥ तिर्य
गिति॥ ॥तिर्यक्कंठविलोलिमौलितरलोत्तंसस्य वंशोज्जातिस्थानकृतावधानललनालक्षै

नीसंवलिताः । स्मेरा कंदलिताः सुसुगंधमधुरे राधामुखेंदौ सुधासारे वो मधुसूदनस्य ददतुः क्षेमं कटाक्षोर्मयः ॥ ह ॥ मधुसूदनकटाक्षोर्मयः वः क्षेमं दधतु । यावदहंमागच्छामि तावदेकाकीं स्त्रियं ज्ञात्वा दैत्या उपद्रवं मा कुर्वंत्वित्यभिप्रायेण मधुदैत्यसूदनस्य कटाक्षस्य तरंगा युष्माकं स्वीकृतिबकुंवचनाभिप्रायेण सर्वासां करोति स्मा शीः[illegible]वा । तत्संबंधात् समानशीलादियुक्तानां सखीनां लडुः स्वं दृष्ट्वा तथान्यतानांमपि । बकुंवचनात् क्षेमं दधतु । कीदृशाः मधुरे राधामुखेंदौ मृदुस्पंदनं इषत्कंपं च वेगीतेषु क्तं सं सुगंधं अत्याह्लादितं यथा स्यात्तथा कंदलिताः पल्लविताः कंदलिताः पल्लविताः कंदलं तु नवांकुरमित्यमरः ॥ लोलत्वात्का । नान्यत्रावलोकनशीलाः । इंदौ [illegible] यथा रच्छितापसंपृक्ता वनस्पतयः चंद्रमसा पल्लविता नवांकुरपल्लवयुक्ता भवंतीति तस्मान्मृदुस्पंदं सं सुगंधत्वमुक्तं ॥ किंच ॥ राधामुखेंदावुत्स्यान्यललनाननान्युडुपस्थानानिवृत्तस्तान्परिहाय तत्रैवोल्लसिता इति भावः । ननु ललना नक्षनिका ।

टेकथं सिद्धिः तत्राह। पुनः कीदृशाः वंशाद्वीरभीति स्थानकृतावधानललनालक्षैर्नसंलक्षि
ताः। वंशात् उदधिकचलन्तानागतिसुस्वरग्राममूर्छनादियुक्तगीतस्थाने सुखेकृतावधानस
मर्पितचित्तहरिविलोलनानिर्लीविरणप्रयुक्तानिर्व्रजसुंदरीलक्षैरसंलक्षैः साधुकप्रकारेणनल
क्षिताः अज्ञाताः तेन नायकाशिरोमणेश्च्याक्तुर्यस्तु चिंतं। कथंभूतस्य मधुसूदनस्य। तिर्यक्कं
ठविलोलमौलितरलोत्तंसस्य। एवंविक्रिवंशोच्चारसमयेगीतस्थानं। तिर्यक्कंठविलोलमौ।ऊ
तरलोत्तंसस्य। एवंविक्रि वंशोच्चारसमयेगीतस्थानं तिर्यक्कंठविलोलमौलितरलोत्तंस
। एवंविक्रिवंशोच्चारसमयेगीतस्थानं तिर्यक्कंठकंधरणाविशेषेणलोलंमौलिशिरोभूष
णं। तरलंचंचलं उत्तंसकर्णभूषणं। यस्य तस्य। ईदृशमधुसूदनस्य एवंविक्रितमर।
वद्धिशेषरसान्वेषणपरस्यकटाक्षैः राधामुखेंदुदर्शनादेवचलल्लोहस्तात्स्रस्तोवंश
यथानवपल्लवोजमेएर्वपल्लवस्रंसनं तथात्रापिमंतव्यंनोचेत्एवंविक्रियाविरोधापत्तिः

गीत० भाव०
९४

स्यात्॥ पूर्वमुक्तं मामुद्वीक्ष्य हस्ताद्वंशस्रंसनं ततस्तीर्यक्कंधविलोलमौलितरलोत्तंश
स्यावंशोद्धरणीति स्थानत्वं पूर्ववशायामवगंतव्यमिति भावः॥ अनयोक्त्या पूर्वहृतमग
वन्निरीक्षणभ्रमणात्तस्मिन्नवसरे मनसि इतरानुसंधानराहित्याद्विरहविस्मरणाद्दुः
खानावकाद्दं मम मेघस्यादित्याशयः॥ ॥ इति श्रीगीतगोविंदे श्रीजयदेवकृतौ भावप्र
बोधिन्यां मुग्धमधुसूदनो नाम तृतीयः सर्गः॥ ३॥ ॥ अत्र श्रीराधाविरहक्लेशान्मु
ग्धो मधुसूदनो जातस्तत्कथा सर्गः॥ तत्र गीतद्वयेनैव माधवं राधिकासखि उवाच विर
हावस्थां राधायाश्चतुर्थेको॥ संगीतेनि गद्यते गत्वा कुंजे निवारजे स्थितं। विषीदंतं च वदंतं त
त्र राधिकाविरहेणैव॥ १॥ अथैवं सखी तत्र गत्वा सती विरहेण कंगादियुक्तं दरितं दृष्ट्वा
तं प्रस्तुवाचेत्यत्राह॥ यमुनातीरेति॥ यमुनातीरवानीरनिकुंजे मंदमास्थितं। प्राह प्रे
मभरोद्भ्रांतं माधवं राधिकासखी॥ १॥ श्रीराधासखी माधवं वदंतीवं तं परवेदनानभि

प्रबोधिनी०
९४

ज्ञं प्रत्याह॥ कीदृशं॥ यमुनातीरवानीरनिकुंजे आस्थितं। विरहसंतापात् यमुनानिय
मातिका हरिं त्यक्त्वा नान्यं करिष्यामीति तथा माधवो व्रजसुंदरीणां त्यागं कृत्वा तस्यास्तस्या
मन्वीक्षाप्राप्ताशक्तोद्यमानन्नु सर्वज्ञत्वाद्यत्र सा स्थिता तत्र कथं न गतस्तत्राह॥ पुनः कीदृ
शं॥ प्रेमभरोद्भ्रांतं श्रीराधिकाविषयप्रेमाधिक्येन तदधिकं उद्भ्रांतं एवंविधं प्रत्याह॥ निं
दति चंदनमिति॥ ॥निंदति चंदनमिंदुकिरणमनुविंदति खेदमधीरं। व्यालनिलयमिल
नेन गरलमिव कलयति मलयसमीरं॥ सा विरहे तव दीना माधव मनसिजविशिखभया
दिव भावनया त्वयि लीना॥ ॥अस्य गीतस्य कर्णाटरागः॥ यथा कृपाणपाणिर्गजदंतप
त्रमेकं वहन् दक्षिणकर्णपूरं॥ संस्तूयमानः सुरचारणौघैः कर्णाटरागः शिखिकंठनील
॥ एकतालीतालः॥ ॥हे माधव लक्ष्मीपते। व्रजेंद्रनंदन सा तव विरहे तव विरहनि
मित्तं दीना॥ यां त्वं प्रत्यक्षकुंजद्रुमं यमुनाकूले रहःकेलिकुंजानि जितां ज्ञात्वा व्रजसुंदरी

गी॰भाव॰
९५

भिःप्रार्थितःसन्मांतत्रसमीपेसंस्थाप्यतांसंत्यज्यवनेविहारार्थंताभिःसहसमागतःसा
नवविरहेदीनादैन्ययुक्तासाता।अधुनाहंअप्रयोजकायतोमाधवःमांविनाद्यएनम
पिनातिष्ठत्सोधुनाऽस्मांत्यक्त्वान्याभिःसहवनेविहरति।एवंविधादीनाजाता।तांतापयुक्तां
ज्ञात्वामदनादितापरूपामकोपायाःकृतास्तान्चंदनादीन्निंदति।अनुपश्चा
दिंदुकिरणेच्छापितातापरूपामकत्वात्।तेन।पित्रापीयस्ययथास्यात्तथाखेदंविंदति।
अहोकिंकृतंकथमत्राहंस्थानस्थितवंदनीरोःसंपर्केणविषमिवमन्यते।तत्रस्थ
सर्पैर्मिलितोमिलितोवायुर्विषाश्रितत्वात्विषमिवोत्पद्यते।तस्मात्समपिनिंदति।[illegible]खेदं
यथा।अयिबारदकन्ययानिजपसारयचंदनंत्वरिता।योगेप[illegible]वनेषुनयोःप्रबलोवि
रहानलोमवीतेति।इंदोःखेदंयथा।विधेपिधेहिशशीनांशुंयावदापातिमेपातिरिति।
यथा।यासर्वयोषितांमध्येआत्मानंवरिष्ठंमन्यमानास्थितापतोहित्वागोपीःकामया

प्रबोधिनी
९५

नामामसौ नजंते प्रियः। सोऽधुनामांत्यक्त्वा वने मुग्धवधूनिकरे विलसतीति साधारणी
श्च वञ्चणीयं दृष्ट्वा सा विगलितनिजोत्कर्षाद्धीना जानेत्यर्थः। ननु विगलितनिजोत्कर्षाद्धी
ना चेत्तत्रागतं मामपि निंदयेत्तत्राह। कथंभूता। मनसिजविशिखभयादिव भावनया त्वयी
लीनाइवात्राप्यर्थे अपीति निश्चितं मनसिजबाणभयात् भावनया ध्याने त्वद्भावनां संला
त्वयी लीना लयं प्राप्ता। अस्यायमाशयः। संयोगेऽस्याः प्रतिनाममतैत्र विचारेऽजितः तस्य प्रि
याधुना वने एकाकी विमुक्ता तिष्ठति ममवैरग्रहणावसरोऽयमिति ज्ञात्वा तस्याप्रियाताड
नीयेति मनसिजविशिखभयात् भावनया त्वयी लीना। मनसि त्वां संस्थाप्य लीना जाता।
यतो दयीवेशितचित्तानां कामावेशितचित्तानां कामारे शास्त्रं हरतः। इति भावनया त्व
यी लीनेति भावो वा। अंतस्थो न निंदिष्यति। ननु कथं ज्ञातं मनसि स्थापितोऽहमित्यत्राह
।अविरलेति॥ ॥अविरलनिपतितमदनशरादिव भवदवनाय विशालं॥ स्वहृदयम

र्मणि वर्म करोति सजलनलिनीदलजालं। सा विरहेण॥२॥ सा स्वहृदयमर्मणि॥ विशालं स
जलनलिनीदलजालं वर्म करोति मनसि स्थितत्वात् स्वहृदयमर्मणि प्राणस्तिष्ठति॥ अत्रा
युर्मर्मणि स्थितो पुंसः प्राणः प्रियस्त्वं तत्र तिष्ठसि तत्र विशालं हृदयादधिकं सजलं
जलसहितं संतप्तहृदि स्थापितं शुष्कं मा भवतु तत्रस्थस्यापि तापं मा बाधत्विति तन्निश्च॥
येण नलिनी स्त्रीजातीया स्वहृदयस्थापनीया चेति तासां जालं समूहं एवंविधं वर्म क
रोति। स्वतापशांत्यर्थं हि तेन विप्रतिपन्नं न भवदवनाय भवद्रक्षार्थं। स्वतापशांत्या
र्थं चेत्तदा तापशांत्यर्थं सचंदनादिकं न निर्दिदेत तत्स्वदवनाय वर्म करोति। तापशांत्य
र्थं वर्मोक्तिर्नोचिता। तद्रक्षार्थं अविरलनिपतितमदनशरादिव। अत्र विरलो विरलता
वकाशरहिता वच्छिन्नधारया नितरां पतितमदप्रापकस्य बाणादिव इत्युत्प्रेक्षि
तो भवद्रक्षार्थं यथा सजलकर्पासतूलीकृतपरिस्थापितेवर्मणि बाणाः न निर्यंते॥

Geeta Govinda vallabhacharya-agrahara.org
Vallabhacharya Prabodhini
Bhav Prabodhini

तथेदमपिसजलनलिनीदलजालवर्मकरोतीतिभावः॥यद्वा॥नितरांपतितोंगेमदनः।म
दयुक्तत्वादतिशयपापीयसोवनेस्त्रियंएकस्थितांविशिखैस्ताडयत्यतोनितरांपतितएवं
विधस्यशराङ्गवदनायवर्मकरोति॥नखलुतापशांत्यर्थमितिभावः।ततःकिंकरोतीत्यत्राह॥
कुसुमविशिखेति॥ ॥कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयं॥व्रतमि
वतवपरिरंभसुखायकरोति॥कुसुमशयनीयंसावि०॥२॥कुसुमशयनीयंकरोति
।नानाकुसुमैःशयनयोग्यंचातिसुखदंशय्यांतवगमनंशालाकरोति।कीदृशंतत्राहअन
ल्पविलासकलासुकमनीयंचअनल्पातिशयशास्त्रोक्तनानासनबंधविशेषकेलीनांकला
सुश्राकांक्षणीयंयोग्यं।एवंविधंतवविरहेउत्सेदत्तेतवपरिरंभसुखायकुसुमविशिखाय
स्यसकामस्तस्यशरतल्पव्रतमिव।कामशरशय्यायथास्यात्तथाकरोति।यथाभीष्मेणमो
क्षसुखायशरशय्याव्रतंकृतंतथेयंकरोतीतिभावः॥शरस्तल्पोत्रूपाज्ञापितः।ततःकु

त्यमाह॥ ॥वहतिचेति॥ ॥वहतिविगलितविलोचनजलधरमाननकमलमुदारं।विधुमि
वविकटविधुंतुददंतदलनगलितामृतधारं॥साविरहे।४॥ ॥सात्वद्विरहेईदृशंआन।
नकमलंवहति।कीदृशं।चकाराकंडूलवलितविलोचनजलधरं।कंडूनयुक्तं।विलोचन
रूपोजलधरोयस्मिंस्तत्।पुनःकीदृशं।उदारंनिरंतरमविच्छिन्नं।श्रुधारावहत्वादुदारंय
थोदारःसःसर्वदादानंकरोति।तथेदमपि।कंडूलवलितत्वादश्रुयुक्तत्वाद्विलोचनस्यज
लधरत्वंविलोचनोऽपातवस्वरूपावलोकनेविगलितत्वाद्विलोचनत्वं एवंविधाननकम
लंधारयति।कमिवविधुमिव।कीदृशंविधुंविकटविधुंतुददंदलितगलितामृतधारं।वि
कटोविशालविकरालयोरितिविश्वः॥विकटातिविकरालोविधुंतुदतीतिविधुंतुदोराहुस्त
द्दंतदलनाद्गलिताऽमृतधारायस्मात्तमिव॥आननकमलंविधुः।बलितविलोचनंराहुः॥अ
श्रुगलितामृतधाराइत्युपमात्रेयं।विलोचनस्यविधुंतुदधर्मसाहरूपाभावात्॥आननेंदोर्वै

थ्याजननाभावात्कथंविधुंतुदत्वंइत्यत्राहमाशयः॥विरहेत्वाननेदौर्घ्याजनकत्वाद्विलोचन
स्पराङ्मुखत्वं अतः।अत्रोक्तिबाता।उक्तार्थः॥अर्थांतरन्यायेनदृढीकरणात्।तथाहिनेदंचन्द्राननेखं
जनोनपतलःकह्लानंदंनहंकारूपंन्यासिकणात्रानोनमधुपस्तबककृपद्यंविना।तिष्ठेधेएव
वंविनानखंजनोनोपंजनोनाभ्रंगोमन्येमीनमदंनमुंचनिजलंमेउखदंसर्वदा।इत्युक्तेः।
र्विलोचनस्पराङ्मुखत्वमाननेऽव्यथाकरणादितिभावः।उत्तमःकिंकरोति।तत्राह।विलखति
रहसीति॥ ॥विलखतिरहसिकुरंगमदेनभवंतमसमशरभूतं।प्रणमतिमकरमधोवि
निधायकरेचशरंनवचूतं।साविरहे०॥५॥साकुरंगमदेनसाक्षाद्दर्शनाभावात्त्वांरहसि
भवंतंविलखति।त्वामालिख्यप्रणयकुपितांधातुरागैःशिलायामित्युक्तत्वात्कुरंगमदे
नलिखति।विरहेकामक्लेशादुन्मादजनितवैक्लव्यत्वादनवस्थितहृदयात्।ततःक्लेशानि
वर्त्तकोपायत्वेनस्वरूपविलेखनादिकमपिकरोति।तद्वर्णसाम्यत्वादंगसौगंध्यत्वात्क

स्वयं विशेषेण यथावयवस्वरूपाकृतियुक्तं लिखति। कीदृशं। असमशरानङ्गं तं। अस
मःशराः कामस्तत्तुल्यं। विरहे कामोऽङ्गारवदस्त्वमपि तथातस्त्वां लिखति त्वत्सं। निध्यं ज्ञात्वा।
कामो न बाधं करोतीत्याशयः। कथं कामतुल्यता तत्राह। मकरमिति। मकरवाहत्वान्म
करंअधआसने विनिधाय परं करे नवाम्रमुकुलबाणं विधाय एवं विशिष्टयुक्तं विलि
खतीत्यर्थः। लिखित्वा किं करोति तत्राह। प्रतिपदमिदमिति॥ ॥प्रतिपदमिदमपि निग
दति माधव तव चरणे पतिताहं। त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदा
हं। सा विरहेण। हा। न केवलं लिखित्वा निष्ठति प्रतिपदं पदं पदं प्रतितिपदं। वारंवारं इदं
हे माधव परवेदनानभिज्ञ अहं तव चरणे पतिता। उत्कृष्टानुभवात्मकत्वान्मनसामोदिको
किंस्वरूपा। इति लक्ष्यं। यद्वा। तव चरणे त्वत्प्रसादकसाधनाभावात्पतिता। तव चरणे प
तिता। कथं यतस्त्वं विमुखः। किं ततः। त्वयि विमुखे मयी सपदीदानीं सुधानिधिः सर्वेत्र

सुधावृष्टिं कृत्वा तापशांतिं करोति इह हरिणोपि चंद्रः मयि तापं तनुतेति विस्तारयती। यतो नाथेनुकू
लतां याति सर्वं यात्यनुकूलतां। तस्मिंस्तु विपरीते तु सर्वमेव तथेति। तदनंतरं किं करोति। तत्राह
ध्यानलयेति॥ ॥ध्यानलयेन पुनः परिकल्प्य भवंतमतीवदुरापं। विलपति हसति विषीदति रो
दिति चंचति मुंचति तापं। सा विर०॥७॥ भवंतं कुरंगमदेन लिखितं मयि तं दृष्ट्वा स्वास्थिम
प्राप्स्या ध्यानलयेन ध्यानावस्थारूपेण पुरोग्रे परिकल्प्य विलपति विशेषेण जल्पति परिभा
षणं करोति। स्वावस्थाद्युपालंनादिकथनमिति। पुरः परिकल्पयति। ध्याने साक्षात्कथं न।
करोति। तत्राह॥ दुरवापमिति। दुःखेनावाप्तुं योग्यं। अनेकं नारीपरिरंभितं तं दृष्ट्वा हिंग
लितनिजे कृतापराधित्वात्स्वयं नागच्छति। एवं स्वतंत्रतयापि ततो दुरवापमिति भावः॥ ध्याने पु
रः परिकल्प्य विलपनाददत्तमुत्तरात् हसति। अहो मम दुर्दैवप्रतिकूलं पुरः स्थितोपि
संभाषणं प्रियः न करोतीत्येवं हसति। यद्वा। दुरवापं। तच्यानेकास्यानंदोच्छलितासति हस

ति।पुनरंतर्हितं बहिःस्फूर्त्त्या विषीदति।विश्लेषेणषीदति खेदं करोति।मयाकथमेव सुपालंभ
नादिकं कृतं यतो गतो नो दर्शनाभावाद्रोदति।यथा सर्वं सरुदुःखस्वरं कृष्णदर्शनलालसेति।
चंचति।चंचगतो।तदन्वेषणार्थं गच्छति।ततो ध्यानदशायामालिंग्य गाढं चुंबति।इति माधवं प्र
तिसखी[illegible]॥ ॥श्रीजयदेवेनभणितमित्यत्राह॥ ॥श्रीजयदेवभणितमिदमधिकमिति
श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयं।हरिविरहाकुलवल्लवयुवतिस।
खिवचनं पठनीयं॰सा विरहेण।।८।। ॥इदं श्रीजयदेवेन भणितं।किं भणितं।यदि इदं पठ
नीयं।तदा अधिकं मनसैव नटनीयं।मनसैव नत्स्पष्टरूपो विचारः कर्तव्यः।ननु बहिःप्र
काशनीयं।कुतः।कीदृशं।हरिविरहाकुलवल्लभयुवतीसखीवचनं॥सखीवचनं॥स
कलदुःखहर्त्ता हरिः।तस्य विरहदुःखेनाकुलीभूतायाः।वल्लवस्य वल्लभा[illegible]लवः वल्लवः।
लववत् तु मिश्रणं मिश्रीभाववती युवती ध्यानलये पुरःपरिकलितत्वात्तथा एवंविधायाः

Geeta Govinda
Bhava Prabodhini

श्रीराधायाःसखीवचनं।यत्रतंउद्वैनपिगनीयं।गीतगोविंदस्ययत्रपाठोभवति।तत्रसर्वत्य
क्ताद्धरिःश्रवणार्थमागच्छति।तस्मादेवंप्रियाविरहःश्रवणात्स्वयमपिव्याकुलोतिदुःखी
भवत्यतोमनस्सोनिटनीयंपवनीयमितिभावः॥सालीविनाकुत्रापिसाख्यैनप्राप्नोत्यंतस्त्राह
॥आवासोविपिनायतइति॥ ॥आवासोविपिनायतेप्रियसखीमालापिजालायते।तापो
पिश्वसितेनदावदहनज्वालाकलापायते॥सापित्वद्विरहेणहंतहरिणीरूपायतेहाकथंकं
दर्पोपियमायतेविरचयन्शार्दूलविक्रीडिती॥१॥हंतेतिखेदे॥हाहासमंजसखेदइति।सा
त्वद्विरहेहरिणीरूपायते।मृगीरूपवदाचरति।गौरासतीविरहेणपांडुवर्णेत्यर्थः॥यथाह
रिणीमृगंविनाकुत्रापिनिर्वृतिंनलभते।तथासात्वंविनेति।तस्याऽप्रियवृंदावनेरागोज्ञापित
इतिभावः॥हरिण्याःप्रकारमाह॥किंचापरं।आवासोविपिनायते।आसमंताद्वासोचितवस
तिस्थानंप्रियसंगमांतरेणदुःखदत्वादरण्यमिवाचरति।यथानिकुंजंअरण्यंअरण्यापर

गीत०भाव०

२००

वीमृगाः हरिणपावाससुखंभवेत्तथापरपति। चपरंप्रियसखीमाऽपिजाल्वायते। समानश्री
ला।म्यसन्नातिप्रियायाः विनादंणांभिन्ननतिष्ठति। एताहरी॥ प्रियसखीनांमालाअपितिनि
श्रितंसूत्रनिर्मितंस्रग्गीयहरणार्थंमावेष्टितंतंयथानवर्तितथापरपति। अतश्चत्वद्विरहदुःखे
न्यामनत्वांकियामालावद्वेष्टितत्वात्। भनन्तुताभिःसहकथंनाचागच्छेदित्यत्राह। तापोपीति।
त्वद्विरहेणतापोबाह्यगात्रतापःआन्तरःश्वसितेनन[illegible]वानिःश्वासनिर्गमिनेनयथाहरिणपाः
दावाग्निज्वालाग्निनियाकंचिन्निर्गविंनत्राकथ्यतेतितद्धसाज्वालायाःकलापःसमूहःतद्धदा
रिति। तस्मादागन्तुमशक्तेतिनावाःरसेतिकंष्टंमहदिदमनुचितं। कंदर्पोपियमायते। किं
कुर्वन्। शार्दूलविक्रीडितंविचारयन्। कंसुखंदर्पयतीतिकंदर्पःसर्वंतसुखंतेनहरीकं
नं। तस्याकवेःस्थितःकापिममसमासुखीनास्तिप्रियोमदासक्तत्वात्तत्सुखमधुनादपि
तंयतस्त्वंकंदर्पविशातध्वागोन्नूखात्तंराधांसत्कान्पाभिःकृतरमणहृष्टत्वादेवंसुखद

प्रबोधन

२००